# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२४)

१३.१२.२०११

# पुनरावर्तनम्

- युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ।
- बहुवचनस्य वस्नसौ ।
- तेमयावेकवचनस्य ।
- त्वामौ द्वितीयायाः ।

- न च वाहाहैवयुक्ते ।
- पश्यार्थैश्चानालोचने ।

# ४१०. सपूर्वायाः प्रथमाया विभाषा (८.१.२६)

- पदत्रयम् । सपूर्वायाः, प्रथमायाः, विभाषा ।
- विद्यमानपूर्वात् प्रथमान्तात् परयोः अनयोः अन्वादेशेऽपि एते आदेशाः वा स्युः ।
- भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । त्वा मा इति वा ।

# ४११. सामन्त्रितम् (२.३.४८)

- पदद्वयम् । सा, आमन्त्रितम् ।
- ‘सम्बोधने च’ (२.३.४७) इत्यतः ‘सम्बोधने’ इति अनुवर्तते ।
- सम्बोधने या प्रथमा तदन्तम् आमन्त्रितसंज्ञं स्यात् ।

# ४१२. आमन्त्रितं पूर्वमविद्यमानवत् (८.१.७२)

- पदत्रयम् । आमन्त्रितम्, पूर्वम्, अविद्यमानवत् ।
- स्पष्टम् ।
- अग्ने तव ।
- देवास्मान् पाहि ।
- अग्ने नय ।
- अग्न इन्द्र वरुण ।
- इह युष्मदस्मदोः आदेशः, तिङन्तनिघातः, आमन्त्रितनिघातश्च न ।

- ‘सर्वदा रक्ष देव नः’ इत्यत्र तु देव इत्यस्य अविद्यमानवद्भावेऽपि ततः प्राचीनं रक्ष इत्येतदाश्रित्य आदेशः ।
- एवम् ‘इमं मे गङ्गे यमुने’ इति मन्त्रे यमुन इत्यादिभ्यः प्राचीनानाम् आमन्त्रितानाम् अविद्यमानवद्भावेऽपि मेशब्दमेव आश्रित्य सर्वेषां निघातः ।

# ४१३. नामन्त्रिते समानाधिकरणे सामान्यवचनम् (८.१.७३)

- चत्वारि पदानि । न, आमन्त्रिते, समानाधिकरणे, सामान्यवचनम् ।
- 'आमन्त्रितं पूर्वमविद्यमानवत्' (८.१.७२) इति अनुवर्तते ।
- विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे न अविद्यमानवत् स्यात् ।
- हरे दयालो नः पाहि ।
- अग्ने तेजस्विन् ।

- ‘विभाषितं विशेषवचने’ (८.१.७४)
- अत्र भाष्यम् ‘बहुवचनमिति वक्ष्यामि’ इति ।
- बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवद् वा ।
- यूयं प्रभवः देवाः शरण्याः, युष्मान् भजे, वो भजे इति वा ।
- इह अन्वादेशेऽपि वैकल्पिकाः आदेशाः ।

# दकारान्तः पुंलिङ्गः 'सुपाद्' शब्दः

- सुपात्/सुपाद्, सुपादौ, सुपादः ।
- सुपादम्, सुपादौ ।

- सुपाद् (शस्) अस्

# ४१४. पादः पत् (६.४.१३०)

- पदद्वयम् । पादः, पत् ।
- ‘अङ्गस्य’ (६.४.१), ‘भस्य’ (६.४.१२९) इति अधिक्रियेते ।
- पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात् ।
- सुपदः ।
- सुपदा ।
- सुपाद्भ्याम् इत्यादि ।

# थकारान्तः पुंलिङ्गः ‘अग्निमथ्’ शब्दः

- अग्निं मन्थति इति अग्निमत्, अग्निमद् ।
- अग्निमथौ, अग्निमथः ।
- अग्निमथम्, अग्निमथौ, अग्निमथः ।
- अग्निमथा, अग्निमद्भ्याम् इत्यादि ।